[A]तन्त्वणम्, तितन्त्वयिषणम् ; तन्त्वयित्वा, तितन्त्वयिषित्वा ;
प्रतन्त्व्य, प्रतितन्त्वयिष्य ; तन्त्वम् २, तन्त्वयित्वा २, } तितन्त्वयिषम् २ ; तितन्त्वयिषित्वा २ ; }
[1]तन्त्वीः.

## (699) "तनु विस्तारे" (VIII-तनादिः-1463. सक. सेट्. उभ.)

'श्रद्धोपकरणार्थस्य तनेस्तनति तानयेत् ॥
दैर्घ्यार्थस्योपसर्गात् तु, विस्तारे तनुतेऽतनोत् ।' (श्लो. 127-128) इति **देवः**।

तानकः-निका, तानकः-निका, [2]तितनिषकः-षिका, तितांसकः-तितंसकः-सिका, [3]तन्तनकः-तंतनकः-निका ;
तनिता-त्री, तानयिता-त्री, तितनिषिता-तितांसिता-तितंसिता-त्री, तन्तनिता-त्री ;
[4]तन्वन्-[B]ती, तानयन्-न्ती, तितनिषन्-तितांसन्-तितंसन्-न्ती ; —

---

1 'अवितृस्तृतन्त्रिभ्य ईः' [द. उ. 1. 82.] इति ईप्रत्ययो भवति । **तन्त्र्यते**= धार्यतेऽनया इति **तन्त्रीः**=सिरा, वादित्रं च ।
'अवी **तन्त्री** तरी लक्ष्मी धी ही श्रीणामुणादिषु ।
सप्त स्त्रीलिङ्गशब्दानां न सुलोपः कदाचन ॥' इति वचनात् **तन्त्रीः** इत्येव, न तु सुलोपः ।

2. '**तनि**पतिदरिद्रातिभ्यः सनो वा इड् वाच्यः, (वा. 7-2-49) इत्यनेन सन इड्विकल्पः । इट्पक्षे रूपमेवम् । इडभावपक्षे, '**तनोते**र्विभाषा' (6-4-17) इत्युपधाया दीर्घविकल्पः । 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनुस्वारः । दीर्घपक्षे **तितांसकः** दीर्घाभावपक्षे, **तितंसकः** इति रूपम् । एवं सन्नन्ते सर्वत्र रूपत्रयस्योपपत्तिः ।

3. 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः । 'स च पदान्तवद् वाच्यः' (वा. 7-4-85) इति वचनेन, 'वा पदान्तस्य' (8-4-59) इति परसवर्णविकल्पः । एवं यङन्ते सर्वत्र परसवर्णघटितमेकम्, अनुस्वारघटितमेकमिति रूपद्वयं बोध्यम् ।

4. '**तना**दिकृञ्भ्य उः' (3-1-79) इति उः विकरणप्रत्ययः । यणादेशः । एवं **तन्वान** इत्यत्रापि बोध्यम् ।

A. 'संज्ञापितः सदसि डेपितवृष्णिवीरे भोजेन्द्र**तन्त्वण**विनिन्द्यममन्त्रतैवम् ॥'
धा. का. 3.33.

B. '**तन्वन्** स मेचभुवि सातरसः स्वबन्धूनक्षण्वतां क्षितिकरो मुदमर्णवानः ।'
धा. का. 3. 4.